# Gangalahari by Jagannatha Pandit

# ગંગાલહરી

## Document Information

Text title : gangAlaharI

File name : gangAlaharI.itx

Category : laharI, devii, nadI, jagannAthapaNDita, devI

Location : doc_devii

Author : Jagannathapandita

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com, Sunder Hattangadi

Latest update : January 12, 2005, June 21, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ગંગાલહરી

સમૃદ્ધં સૌભાગ્યં સકલવસુધાયાઃ કિમપિ તન્
મહૈશ્વર્યં લીલાજનિતજગતઃ ખણ્ડપરશોઃ ।
શ્રુતીનાં સર્વસ્વં સુકૃતમથ મૂર્તં સુમનસાં
સુધાસોદર્યં તે સલિલમશિવં નઃ શમયતુ ॥ ૧॥

દરિદ્રાણાં દૈન્યં દુરિતમથ દુર્વાસનહૃદાં
દ્રુતં દૂરીકુર્વન્ સકૃદપિ ગતો દૃષ્ટિસરણિમ્ ।
અપિ દ્રાગાવિદ્યાદ્રુમદલનદીક્ષાગુરુરિહ
પ્રવાહસ્તે વારાં શ્રિયમયમપારાં દિશતુ નઃ ॥ ૨॥

ઉદઞ્ચન્માર્તણ્ડસ્ફુટકપટહેરમ્બજનની-
કટાક્ષવ્યાક્ષેપક્ષણજનિતસંક્ષોભનિવહાઃ ।
ભવન્તુ ત્વઙ્ગન્તો હરશિરસિ ગઙ્ગાતનુભુવ-
સ્તરઙ્ગાઃ પ્રોત્તુઙ્ગા દુરિતભયભઙ્ગાય ભવતામ્ ॥ ૩॥

તવાલમ્બાદમ્બ સ્ફુરદલઘુગર્વેણ સહસા
મયા સર્વેઽવજ્ઞાસરણિમથ નીતાઃ સુરગણાઃ ।
ઇદાનીમૌદાસ્યં ભજસિ યદિ ભાગીરથિ તદા
નિરાધારો હા રોદિમિ કથય કેષામિહ પુરઃ ॥ ૪॥

સ્મૃતિં યાતા પુંસામકૃતસુકૃતાનામપિ ચ યા
હરત્યન્તસ્તન્દ્રાં તિમિરમિવ ચન્દ્રાંશુસરણિઃ ।
ઇયં સા તે મૂર્તિઃ સકલસુરસંસેવ્યસલિલા
મમાન્તઃસન્તાપં ત્રિવિધમપિ પાપં ચ હરતામ્ ॥ ૫॥

અપિ પ્રાજ્યં રાજ્યં તૃણમિવ પરિત્યજ્ય સહસા
વિલોલદ્વાનીરં તવ જનનિ તીરં શ્રિતવતામ્ ।
સુધાતઃ સ્વાદીયસ્સલિલભરમાતૃપ્તિ પિબતાં
જનાનામાનન્દઃ પરિહસતિ નિર્વાણપદવીમ્ ॥ ૬॥

પ્રભાતે સ્નાતીનાં નૃપતિરમણીનાં કુચતટી-
ગતો યાવન્માતર્મિલતિ તવ તોયૈર્મૃગમદઃ ।
મૃગાસ્તાવદ્વૈમાનિકશતસહસ્રૈઃ પરિવૃતા
વિશન્તિ સ્વચ્છન્દં વિમલવપુષો નન્દનવનમ્ ॥ ૭॥

સ્મૃતં સદ્યઃ સ્વાન્તં વિરચયતિ શાન્તં સકૃદપિ
પ્રગીતં યત્પાપં ઝટિતિ ભવતાપં ચ હરતિ ।
ઇદં તદ્ગઙ્ગેતિ શ્રવણરમણીયં ખલુ પદં
મમ પ્રાણપ્રાન્તે વદનકમલાન્તર્વિલસતુ ॥ ૮॥

યદન્તઃ ખેલન્તો બહુલતરસન્તોષભરિતા
ન કાકા નાકાધીશ્વરનગરસાકાઙ્ક્ષમનસઃ ।
નિવાસાલ્લોકાનાં જનિમરણશોકાપહરણં
તદેતત્તે તીરં શ્રમશમનધીરં ભવતુ નઃ ॥ ૯॥

ન યત્સાક્ષાદ્વેદૈરપિ ગલિતભેદૈરવસિતં
ન યસ્મિન્ જીવાનાં પ્રસરતિ મનોવાગવસરઃ ।
નિરાકારં નિત્યં નિજમહિમનિર્વાસિતતમો
વિશુદ્ધં યત્તત્ત્વં સુરતટિનિ તત્ત્વં ન વિષયઃ ॥ ૧૦॥

મહાદાનૈર્ધ્યાનૈર્બહુવિધવિતાનૈરપિ ચ યન્
ન લભ્યં ઘોરાભિઃ સુવિમલતપોરાશિભિરપિ ।
અચિન્ત્યં તદ્વિષ્ણોઃ પદમખિલસાધારણતયા
દદાના કેનાસિ ત્વમિહ તુલનીયા કથય નઃ ॥ ૧૧॥

નૃણામીક્ષામાત્રાદપિ પરિહરન્ત્યા ભવભયં
શિવાયાસ્તે મૂર્તેઃ ક ઇહ મહિમાનં નિગદતુ ।
અમર્ષમ્લાનાયાઃ પરમમનુરોધં ગિરિભુવો
વિહાય શ્રીકણ્ઠઃ શિરસિ નિયતં ધારયતિ યામ્ ॥ ૧૨॥

વિનિન્દ્યાન્યુન્મત્તૈરપિ ચ પરિહાર્યાણિ પતિતૈ-
રવાચ્યાનિ વ્રાત્યૈઃ સપુલકમપાસ્યાનિ પિશુનૈઃ ।
હરન્તી લોકાનામનવરતમેનાંસિ કિયતાં
કદાપ્યશ્રાન્તા ત્વં જગતિ પુનરેકા વિજયસે ॥ ૧૩॥

સ્ખલન્તી સ્વર્લોકાદવનિતલશોકાપહૃતયે

જટાજૂટગ્રન્થૌ યદસિ વિનિબદ્ધા પુરભિદા ।
અયે નિર્લોભાનામપિ મનસિ લોભં જનયતાં
ગુણાનામેવાયં તવ જનનિ દોષઃ પરિણતઃ ॥ ૧૪॥

જડાનન્ધાન્ પઙ્ગૂન્ પ્રકૃતિબધિરાનુક્તિવિકલાન્
ગ્રહગ્રસ્તાનસ્તાખિલદુરિતનિસ્તારસરણીન્ ।
નિલિમ્પૈર્નિર્મુક્તાનપિ ચ નિરયાન્તર્નિપતતો
નરાનમ્બ ત્રાતું ત્વમિહ પરમં ભેષજમસિ ॥ ૧૫॥

સ્વભાવસ્વચ્છાનાં સહજશિશિરાણામયમપા-
મપારસ્તે માતર્જયતિ મહિમા કોઽપિ જગતિ ।
મુદાયં ગાયન્તિ દ્યુતલમનવદ્યદ્યુતિભૃતઃ
સમાસાદ્યાદ્યાપિ સ્ફુટપુલકસાન્દ્રાઃ સગરજાઃ ॥ ૧૬॥

કૃતક્ષુદ્રૈનસ્કાનથ ઝટિતિ સન્તપ્તમનસઃ
સમુદ્ધર્તું સન્તિ ત્રિભુવનતલે તીર્થનિવહાઃ ।
અપિ પ્રાયશ્ચિત્તપ્રસરણપથાતીતચરિતા-
ન્નરાનૂરીકર્તું ત્વમિવ જનનિ ત્વં વિજયસે ॥ ૧૭॥

નિધાનં ધર્માણાં કિમપિ ચ વિધાનં નવમુદાં
પ્રધાનં તીર્થાનામમલપરિધાનં ત્રિજગતઃ ।
સમાધાનં બુદ્ધેરથ ખલુ તિરોધાનમધિયાં
શ્રિયામાધાનં નઃ પરિહરતુ તાપં તવ વપુઃ ॥ ૧૮॥

પુરો ધાવં ધાવં દ્રવિણમદિરાઘૂર્ણિતદૃશાં
મહીપાનાં નાનાતરુણતરખેદસ્ય નિયતમ્ ।
મમૈવાયં મન્તુઃ સ્વહિતશતહન્તુર્જડધિયો
વિયોગસ્તે માતર્યદિહ કરુણાતઃ ક્ષણમપિ ॥ ૧૯॥

મરુલ્લીલાલોલલ્લહરિલુલિતામ્ભોજપટલી-
સ્ખલત્પાંસુવ્રાતચ્છુરણવિસરત્કૌઙ્કુમરુચિ ।
સુરસ્ત્રીવક્ષોજક્ષરદગરુજમ્બાલજટિલં
જલં તે જમ્બાલં મમ જનનજાલં જરયતુ ॥ ૨૦॥

સમુત્પત્તિઃ પદ્મારમણપદપદ્મામલનખા-
ન્નિવાસઃ કન્દર્પપ્રતિભટજટાજૂટભવને ।
અથાઽયં વ્યાસઙ્ગો હતપતિતનિસ્તારણવિધૌ

ન કસ્માદુત્કર્ષસ્તવ જનનિ જાગર્તુ જગતિ ॥ ૨૧॥

નગેભ્યો યાન્તીનાં કથય તટિનીનાં કતમયા
પુરાણાં સંહર્તુઃ સુરધુનિ કપર્દોઽધિરુરુહે ।
કયા વા શ્રીભર્તુઃ પદકમલમક્ષાલિ સલિલૈ-
સ્તુલાલેશો યસ્યાં તવ જનનિ દીયેત કવિભિઃ ॥ ૨૨॥

વિધત્તાં નિઃશઙ્કં નિરવધિ સમાધિં વિધિરહો
સુખં શેષે શેતાં હરિરવિરતં નૃત્યતુ હરઃ ।
કૃતં પ્રાયશ્ચિત્તૈરલમથ તપોદાનયજનૈઃ
સવિત્રી કામાનાં યદિ જગતિ જાગર્તિ જનની ॥ ૨૩॥

અનાથઃ સ્નેહાર્દ્રાં વિગલિતગતિઃ પુણ્યગતિદાં
પતન્ વિશ્વોદ્ધર્ત્રીં ગદવિગલિતઃ સિદ્ધભિષજમ્ ।
સુધાસિન્ધું તૃષ્ણાકુલિતહૃદયો માતરમયં
શિશુઃ સમ્પ્રાપ્તસ્ત્વામહમિહ વિદધ્યાઃ સમુચિતમ્ ॥ ૨૪॥

વિલીનો વૈ વૈવસ્વતનગરકોલાહલભરો
ગતા દૂતા દૂરં ક્વચિદપિ પરેતાન્ મૃગયિતુમ્ ।
વિમાનાનાં વ્રાતો વિદલયતિ વીથિર્દિવિષદાં
કથા તે કલ્યાણી યદવધિ મહીમણ્ડલમગાત્ ॥ ૨૫॥

સ્ફુરત્કામક્રોધપ્રબલતરસઞ્જાતજટિલ-
જ્વરજ્વાલાજાલજ્વલિતવપુષાં નઃ પ્રતિદિનમ્ ।
હરન્તાં સન્તાપં કમપિ મરુદુલ્લાસલહરિ-
ચ્છટાચઞ્ચત્પાથઃકણસરણયો દિવ્યસરિતઃ ॥ ૨૬॥

ઇદં હિ બ્રહ્માણ્ડં સકલભુવનાભોગભવનં
તરઙ્ગૈર્યસ્યાન્તર્લુઠતિ પરિતસ્તિન્દુકમિવ ।
સ એષ શ્રીકણ્ઠપ્રવિતતજટાજૂટજટિલો
જલાનાં સઙ્ઘાતસ્તવ જનનિ તાપં હરતુ નઃ ॥ ૨૭॥

ત્રપન્તે તીર્થાનિ ત્વરિતમિહ યસ્યોદ્ધૃતિવિધૌ
કરં કર્ણે કુર્વન્ત્યપિ કિલ કપાલિપ્રભૃતયઃ ।
ઇમં ત્વં મામમ્બ ત્વમિયમનુકમ્પાર્દ્રહૃદયે
પુનાના સર્વેષામઘમથનદર્પં દલયસિ ॥ ૨૮॥

શ્વપાકાનાં વ્રાતૈરમિતવિચિકિત્સાવિચલિતૈ-
ર્વિમુક્તાનામેકં કિલ સદનમેનઃપરિષદામ્ ।
અહો મામુદ્ધર્તું જનનિ ઘટયન્ત્યાઃ પરિકરં
તવ શ્લાઘાં કર્તું કથમિવ સમર્થો નરપશુઃ ॥ ૨૯॥

ન કોઽપ્યેતાવન્તં ખલુ સમયમારભ્ય મિલિતો
યદુદ્ધારાદારાદ્ભવતિ જગતો વિસ્મયભરઃ ।
ઇતીમામીહાં તે મનસિ ચિરકાલં સ્થિતવતી-
મયં સમ્પ્રાપ્તોઽહં સફલયિતુમમ્બ પ્રણય નઃ ॥ ૩૦॥

શ્વવૃત્તિવ્યાસઙ્ગો નિયતમથ મિથ્યાપ્રલપનં
કુતર્કેશ્વભ્યાસઃ સતતપરપૈશુન્યમનનમ્ ।
અપિ શ્રાવં શ્રાવં મમ તુ પુનરેવં ગુણગણા-
નૃતે ત્વત્કો નામ ક્ષણમપિ નિરીક્ષેત વદનમ્ ॥ ૩૧॥

વિશાલાભ્યામાભ્યાં કિમિહ નયનાભ્યાં ખલુ ફલં
ન યાભ્યામાલીઢા પરમરમણીયા તવ તનુઃ ।
અયં હિ ન્યક્કારો જનનિ મનુજસ્ય શ્રવણયો-
ર્યયોર્નાન્તર્યાતસ્તવ લહરિલીલાકલકલઃ ॥ ૩૨॥

વિમાનૈઃ સ્વચ્છન્દં સુરપુરમયન્તે સુકૃતિનઃ
પતન્તિ દ્રાક્ પાપા જનનિ નરકાન્તઃ પરવશાઃ ।
વિભાગોઽયં તસ્મિન્નશુભમયમૂર્તૌ જનપદે
ન યત્ર ત્વં લીલાદલિતમનુજાશેષકલુષા ॥ ૩૩॥

અપિ ઘ્નન્તો વિપ્રાનવિરતમુશન્તો ગુરુસતીઃ
પિબન્તો મૈરેયં પુનરપિ હરન્તશ્ચ કનકમ્ ।
વિહાય ત્વય્યન્તે તનુમતનુદાનાધ્વરજુષા-
મુપર્યમ્બ ક્રીડન્ત્યખિલસુરસમ્ભાવિતપદાઃ ॥ ૩૪॥

અલભ્યં સૌરભ્યં હરતિ સતતં યઃ સુમનસાં
ક્ષણાદેવ પ્રાણાનપિ વિરહશસ્ત્રક્ષતહૃદામ્ ।
ત્વદીયાનાં લીલાચલિતલહરીણાં વ્યતિકરાત્
પુનીતે સોઽપિ દ્રાગહહ પવમાનસ્ત્રિભુવનમ્ ॥ ૩૫॥

કિયન્તઃ સન્ત્યેકે નિયતમિહલોકાર્થઘટકાઃ
પરે પૂતાત્માનઃ કતિ ચ પરલોકપ્રણયિનઃ ।

સુખં શેતે માતસ્તવ ખલુ કૃપાતઃ પુનરયં
જગન્નાથઃ શશ્વત્ત્વયિ નિહિતલોકદ્વયભરઃ ॥ ૩૬॥

ભવત્યા હિ વ્રાત્યાધમપતિતપાખણ્ડપરિષત્
પરિત્રાણસ્નેહઃ શ્લથયિતુમશક્યઃ ખલુ યથા ।
મમાપ્યેવં પ્રેમા દુરિતનિવહેષ્વમ્બ જગતિ
સ્વભાવોઽયં સર્વૈરપિ ખલુ યતો દુષ્પરિહરઃ ॥ ૩૭॥

પ્રદોષાન્તર્નૃત્યત્પુરમથનલીલોદ્ધૃતજટા-
તટાભોગપ્રેઙ્ખલ્લહરિભુજસન્તાનવિધુતિઃ ।
બિલક્રોડક્રીડજ્જલડમરુટઙ્કારસુભગ-
સ્તિરોધત્તાં તાપં ત્રિદશતટિનીતાણ્ડવવિધિઃ ॥ ૩૮॥

સદૈવ ત્વય્યેવાર્પિતકુશલચિન્તાભરમિમં
યદિ ત્વં મામમ્બ ત્યજસિ સમયેઽસ્મિન્સુવિષમે ।
તદા વિશ્વાસોઽયં ત્રિભુવનતલાદસ્તમયતે
નિરાધારા ચેયં ભવતિ ખલુ નિર્વ્યાજકરુણા ॥ ૩૯॥

કપર્દાદુલ્લસ્ય પ્રણયમિલદર્ધાઙ્ગયુવતેઃ
પુરારેઃ પ્રેઙ્ખન્ત્યો મૃદુલતરસીમન્તસરણૌ ।
ભવાન્યા સાપત્ન્યસ્ફુરિતનયનં કોમલરુચા
કરેણાક્ષિપ્તાસ્તે જનનિ વિજયન્તાં લહરયઃ ॥ ૪૦॥

પ્રપદ્યન્તે લોકાઃ કતિ ન ભવતીમત્રભવતી-
મુપાધિસ્તત્રાયં સ્ફુરતિ યદભીષ્ટં વિતરસિ ।
શપે તુભ્યં માતર્મમ તુ પુનરાત્મા સુરધુનિ
સ્વભાવાદેવ ત્વય્યમિતમનુરાગં વિધૃતવાન્ ॥ ૪૧॥

લલાટે યા લોકૈરિહ ખલુ સલીલં તિલકિતા
તમો હન્તું ધત્તે તરુણતરમાર્તણ્ડતુલનામ્ ।
વિલુમ્પન્તી સદ્યો વિધિલિખિતદુર્વર્ણસરણિં
ત્વદીયા સા મૃત્સ્ના મમ હરતુ કૃત્સ્નામપિ શુચમ્ ॥ ૪૨॥

નરાન્ મૂઢાંસ્તત્તજ્જનપદસમાસક્તમનસો
હસન્તઃ સોલ્લાસં વિકચકુસુમવ્રાતમિષતઃ ।
પુનાનાઃ સૌરભ્યૈઃ સતતમલિનો નિત્યમલિનાન્
સખાયો નઃ સન્તુ ત્રિદશતટિનીતીરતરવઃ ॥ ૪૩॥

યજન્ત્યેકે દેવાન્ કઠિનતરસેવાંસ્તદપરે
વિતાનવ્યાસક્તા યમનિયમરક્તાઃ કતિપયે ।
અહં તુ ત્વન્નામસ્મરણકૃતકામસ્ત્રિપથગે
જગજ્જાલં જાને જનનિ તૃણજાલેન સદૃશમ્ ॥ ૪૪॥

અવિશ્રાન્તં જન્માવધિ સુકૃતજન્માર્જનકૃતાં
સતાં શ્રેયઃ કર્તું કતિ ન કૃતિનઃ સન્તિ વિબુધાઃ ।
નિરસ્તાલમ્બાનામકૃતસુકૃતાનાં તુ ભવતીં
વિનાઽમુષ્મિંલ્લોકે ન પરમવલોકે હિતકરમ્ ॥ ૪૫॥

પયઃ પીત્વા માતસ્તવ સપદિ યાતઃ સહચરૈ-
ર્વિમૂઢૈઃ સંરન્તું ક્વચિદપિ ન વિશ્રાન્તિમગમમ્ ।
ઇદાનીમુત્સઙ્ગે મૃદુપવનસઞ્ચારશિશિરે
ચિરાદુન્નિદ્રં માં સદયહૃદયે શાયય ચિરમ્ ॥ ૪૬॥

બધાન દ્રાગેવ દ્રઢિમરમણીયં પરિકરં
કિરીટે બાલેન્દું નિયમય પુનઃ પન્નગગણૈઃ ।
ન કુર્યાસ્ત્વં હેલામિતરજનસાધારણતયા
જગન્નાથસ્યાયં સુરધુનિ સમુદ્ધારસમયઃ ॥ ૪૭॥

શરચ્ચન્દ્રશ્વેતાં શશિશકલશ્વેતાલમુકુટાં
કરૈઃ કુમ્ભામ્ભોજે વરભયનિરાસૌ ચ દધતીમ્ ।
સુધાધારાકારાભરણવસનાં શુભ્રમકર-
સ્થિતાં ત્વાં યે ધ્યાયન્ત્યુદયતિ ન તેષાં પરિભવઃ ॥ ૪૮॥

દરસ્મિતસમુલ્લસદ્વદનકાન્તિપૂરામૃતૈ-
ર્ભવજ્વલનભર્જિતાનનિશમૂર્જયન્તી નરાન્ ।
ચિદેકમયચન્દ્રિકાચયચમત્કૃતિં તન્વતી
તનોતુ મમ શન્તનોઃ સપદિ શન્તનોરઙ્ગના ॥ ૪૯॥

મન્ત્રૈર્મીલિતમૌષધૈર્મુકુલિતં ત્રસ્તં સુરાણાં ગણૈઃ
સ્રસ્તં સાન્દ્રસુધારસૈર્વિદલિતં ગારુત્મતૈર્ગ્રાવભિઃ ।
વીચિક્ષાલિતકાલિયાહિતપદે સ્વર્લોકકલ્લોલિનિ
ત્વં તાપં તિરયાધુના મમ ભવજ્વાલાવલીઢાત્મનઃ ॥ ૫૦॥

ધૂતે નાગેન્દ્રકૃત્તિપ્રમથગણમણિશ્રેણિનન્દીન્દુમુખ્યં

સર્વસ્વં હારયિત્વા સ્વમથ પુરભિદિ દ્રાક્ પણીકર્તુકામે ।
સાકૂતં હૈમવત્યા મૃદુલહસિતયા વીક્ષિતાયાસ્તવામ્બ
વ્યાલોલોલ્લાસિવલ્ગલ્લહરિનટઘટીતાણ્ડવં નઃ પુનાતુ ॥ ૫૧॥

વિભૂષિતાનઙ્ગરિપૂત્તમાઙ્ગા સદ્યઃકૃતાનેકજનાર્તિભઙ્ગા ।
મનોહરોત્તુઙ્ગચલત્તરઙ્ગા ગઙ્ગા મમાઙ્ગાન્યમલીકરોતુ ॥ ૫૨॥

ઇમાં પીયૂષલહરીં જગન્નાથેન નિર્મિતામ્ ।
યઃ પઠેત્તસ્ય સર્વત્ર જાયન્તે સુખસમ્પદઃ ॥ ૫૩॥

Encoded and proofread by Arvind Kolhatkar akolhatkar at rogers.com
Proofread by Sunder Hattangadi

---

*Gangalahari by Jagannatha Pandit*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*